

શેઠ નેમચંદ દેવચંદ કાપડવાળા,
પાંચકૂવા, અમદાવાદ

श्रीहेमचन्द्राचार्यग्रन्थावली ग्रन्थाङ्क २

महावादिश्रीसिद्धसेनदिवाकरप्रणीत–

न्यायावतारः

श्री राजशेखरसूरिविरचितटिप्पनसमलङ्कृत

आचार्यसिद्धर्षिविरचितविवृतिसहित.

श्रीमत्पन्यासनीतिविजयमहाराजसमुपदिष्ट–अमदावाद-फीकाभटनी
पोळवाळा सुश्राद्धवर्य–नेमचंद देवचंद इत्येतस्य आर्थिक–
साहाय्येन पट्टनस्थहेमचन्द्राचार्यसभाया सेक्रेटरी
लेहरुभाइ भोगीलाल इत्यनेन प्रकाशितः ।

वळावास्तव्येन हर्षचन्द्रात्मजेन पण्डित-
भगवानदासेन संशोधितश्च

आवृत्ति प्रथमा प्रत ५००

संवत् १९७३ सन १९१७

—×—

मूल्यमष्ट आणकाः

इदं पुस्तकं अमदावाद युनीयनप्रिन्टींगमुद्रालयाधिपतिना
मोतीलाल शामळदास इत्यनेन मुद्रितम् ।

प्रस्तावना.

आ 'न्यायावतार' ग्रन्थना प्रणेता महाकवि श्री **सिद्धसेनदिवाकर**, जेओए अभिनव न्यायप्रणालीथी ग्रन्थ लखवानो प्रथम प्रारम्भ कर्यो छे तेओनो जन्म विक्रमादित्यना समयमां उज्जयिनीमां थयो हतो. तेमना पिता कात्यायनगोत्रीय देवर्षि नामे ब्राह्मण हता, अने तेमना मातानुं नाम देवश्री हतुं. तेओ बुद्धिमान् होवाथी बाल्यावस्थामां सर्व शास्त्र निष्णात थया हता. तेमने वाद करवामां घणी कुशलता मळेली होवाथी ते काळना समर्थ वादिओमां तेमनी गणना थती हती. एक वेळाए स्कन्दिलाचार्यना शिष्य आ-चार्य वृद्धवादि साथे तेमनो मेळाप थयो. तेमनी वाद करवानी इच्छा होवाथी बन्नेनो राजसभामां वाद थयो, अने सिद्धसेनदिवाकरनो पराजय थयो आथी तेओ आचार्य वृद्धवादिना शिष्य थया, अने तेमना पासे दीक्षा लीधी दीक्षा वखते तेमनुं नाम परावर्तन करी कुमुदचन्द्र राख्युं. पण तेमनी विशेष प्रसिद्धि 'सिद्धसेनदिवाकर' ए नामथी ज थई. आ हकीकत 'प्रभा-वकचरित्रमां वर्णवेली छे. तेथी तेमनुं अस्तित्व विक्रमनी प्रथम शताब्दि नही शकाय. तेमणे बनावेल सम्मतितर्क ग्रन्थ उपर महावीर पछी ८८४ वर्षे एटले विक्रम संवत् ४१४ मां बौद्धोनो पराजय करनार आचार्य मल्लवादी[2]ए टीका रची छे. जो के हाल ते टीका आपणने मळी शकती नथी तो पण हरिभद्रसूरि स्वोपज्ञअनेकान्तवादप्रवेशकानी टी-कामां सम्मतिना टीकाकार तरीके मल्लवादिनुं स्मरण करे छे. आथी एटलुं तो निश्चित थाय छे के तेमनो समय विक्रम संवत् ४१४ पहेलानो छे

---

१ प्रभावकचरित्र सं. १३३४ मां प्रभाचन्द्रसूरिए रच्युं छे
वेदानलशिखिशशिधरवर्षे चैत्रस्य धवलसप्तम्याम् ।
शुक्रे पुनर्वसुदिने संपूर्णं पूर्वर्षिचरित्रम् ॥
(प्रभावकचरित्रम् प्रशस्ति श्लो. २२)

२ श्री वीरवत्सरादथ शताष्टके चतुरशीतिसंयुक्ते ।
जिग्ये स मल्लवादी बौद्धांस्तद्व्यन्तरांश्चापि ॥
(प्रभावकचरित्रम्)

तेओ तर्कशास्त्रमां घणाज निपुण हता. ते तेमनो बनावेल संमतितर्क— 'जे प्रौढ तर्कनो ग्रन्थ छे' तेपरथी विद्वानोने स्पष्ट समजाय तेम छे. हरिभद्रसूरि हेमचन्द्राचार्य इत्यादि समर्थ विद्वानोए पोताना ग्रन्थोमां 'महावादि' 'वादि मुख्य' इत्यादि विशेषणोथी तेमने विभूषित करेल छे ते तेमनी असाधारण तर्कशक्तिनी साक्षीरूप छे, अने तेथीज तेओ तार्किक तरीके प्रसिद्ध थयेल छे. विद्वानोनु एवु मानवु छे के— जैनसाहित्यमां तर्कशास्त्रनु प्रथम पुस्तक तेमणे ज बनाव्यु छे. तेना पहेलानो तर्कशास्त्रनो खास ग्रन्थ कोई नहोतो. पाछळना आचार्योए जे तर्कशास्त्रना ग्रन्थो बनाव्या छे, ते खास आ पद्धतिथी ज रच्या छे. डो. सतीशचन्द्र विद्याभूषण पोताना मध्यकालीन भारतीय न्यायशास्त्रना पुस्तकमां लखे छे के "ऐतिहासिक कालमां सर्वथी पहेला न्यायशास्त्रने नियमबद्ध लखनार जैन लेखक सिद्धसेन दिवाकर मालूम पडे छे, तेना पहेला जैनन्यायनो खास ग्रन्थ सम्भवत नहि हतो. ते वेळा न्यायनी वातो धर्मशास्त्र अने सिद्धान्तना ग्रन्थोमां गर्भित हती. तेमणे सर्वथी पहेला न्यायावतार नामे न्यायग्रन्थ बनावी न्यायशास्त्रनी स्थापना करी."

आथी सिद्ध थाय छे के जैन तर्कशास्त्रना आदि पिता ते सिद्धसेन दिवाकर छे. जेवा ते महान् तार्किक हता तेवाज ते उत्कृष्ट कवि हता. तेमणे बनावेल कल्याण मंदिर इत्यादि स्तोत्रोथी ते वात स्पष्ट मालूम पड्या सिवाय रहेती नथी.

जगत्प्रसिद्ध हेमचन्द्राचार्य पण सिद्धहैमशब्दानुशासनमां उदाहरण प्रसंगे 'अनुसिद्धसेनं कवयः' ए प्रयोग वडे तेमने सर्वोत्कृष्ट कवि तरीके बताव्या छे. अयोगव्यवच्छेद द्वात्रिंशिकामां पण 'क्व सिद्धसेनस्तुतयो महार्था' इत्यादि वडे तेमना गुणोनु सारी पेठे गान कर्यु छे. धर्मशास्त्रमां पण आठ प्रभावक पुरुषोनी गणनामां सिद्धसेनदिवाकरनी कवि प्रभावकमां गणना करी छे. तेमना बनावेल ग्रन्थोमां प्रसिद्ध ग्रन्थ संमतितर्क छे, जेनी विद्वानोमां घणी ख्याति छे. ते संमतितर्क

उपर प्हेला घणी टीकाओ हती, परन्तु हाल मात्र एक टीका राजगच्छीय अभयदेवसूरिकृत मळे छे, ए शिवाय पण 'द्वात्रिंशत् द्वात्रिंशिका' ए स्तुतिसंग्रह ग्रन्थ रच्यो छे, तेमानो न्यायावतार एक स्तुतिरूप ग्रन्थ छे जेनो आरभ मात्र प्रमाणनी व्युत्पत्ति थाय तेटला माटे छे प्रमाण प्रमेय तथा प्रसगे आवता नय, हेत्वाभास, पक्ष, दृष्टान्त वगेरे बाबतो सक्षेपमा बहु सारी रीते बतावी छे तेमना उपर उपमितिभवप्रपचा कथाना कर्ता गर्गर्षिना शिष्य आचार्य सिद्धर्षिए विवृति रची छे तेओ डो कुत्रत्ना कहेवा प्रमाणे ९६२ मा विद्यमान हता आचार्य सिद्धर्षिनी विवृति उपर मलधारगच्छीय हेमचन्द्राचार्यना शिष्य राजशेखरसूरिए टिप्पन रच्यु छे ते स १४०५ मा विद्यमान हता तेमणे रत्नाकरावतारिका—न्यायना ग्रन्थ उपर पण टिप्पन रचेलु छे

आ न्यायावतार विवृति अने टिप्पन सहित यथामति शुद्ध करी प्रकाशित कर्यो छे छता टाइपो उडी जवाथी मति भ्रमथी काइ भूलो रही होय तेने माटे क्षमा मागु छु

आ पुस्तक शुद्ध करवामा भावनगरना शेठ कुवरजीभाइ आणदजी तरफथी टीका तथा टिप्पननी एकएक प्रत मळी हती, तथा पाटणना वाडी पार्श्वनाथजीना भडारना वहीवट कर्ता शेठ वाडीलाल हीराचद तरफथी टीका तथा टिप्पननी प्रत मळी हती माटे ते बन्ने महाशयोनो आभार मानवामा आवे छे एज

अमदावाद
वैशाख शुक्ल एकादशी
स १९७३

लि प्रकाशक

न्यायावतारे तट्टीकायां च प्रतिपादितानां

विषयाणामनुक्रमणिका ॥



श्रीहेमचन्द्राचार्यग्रन्थावली—

प्रकाशित ग्रन्थो.

१ दोधकवृत्ति (पाटणवाळा सत्वी पानाचंद मोतीचंदनी मददथी)
[साधुसाध्वीने भेट] मूल्य ०–३–०

२ न्यायावतार टीकाटिप्पनसहित (अमदावाद कीकाभट्टनी पोळवाळा शाह नेमचंद देवचंदनी मददथी) पडतर मूल्यथी अर्ध मूल्य ०–८–०

छपाता ग्रन्थो.

१ शब्दमहार्णवबृहन्न्यास सिद्धहैमबृहद्वृत्तिसहित कलिकालसर्वज्ञ श्रीहेमचन्द्राचार्यविरचित

२ अनेकान्तवादप्रवेश श्रीहरिभद्रसूरिविरचित (पाटणवाळा सत्वी मोतीचंद पानाचंदनी मददथी)

३ वसुदेवहिण्डीसार

४ सिद्धदूत

छपाववा माटे तैयार थता ग्रन्थो.

---

१ प्राकृतव्याकरण सिद्धहैम अष्टम अध्याय (रतलामवाळा सरूपचंद लक्ष्मीचंदनी मददथी)

२ चतुर्विंशतिप्रबन्ध

३ द्विसन्धानमहाकाव्य

४ महत्कद्वात्रिंशिका (पाटणवाळा मगनलाल हीराचंदनी मददथी)

५ द्विजवदनचपेटिका (पाटणवाळा नरचंद भीमचंदनी मददथी)

६ मार्गपरिशुद्धि श्रीयशोविजयोपाध्यायविरचित

७ धर्मपरीक्षा ,,

श्रीहेमचन्द्राचार्यजैनसभा
श्रीहेमचन्द्राचार्यग्रन्थावली ऑफीस
(गूजरात) पाटण

अर्हँ

तर्कपञ्चाननश्रीसिद्धसेनदिवाकरविरचितः

न्यायावतारः

—×✱×—

श्रीराजशेखरसूरिकृतटिप्पनसवलितश्रीसिद्धर्षिगणिकृतटीकासहितः।

अविद्युतसामान्यविशेषदेशिनं वर्द्धमानमानम्य।
न्यायावतारविवृतिः स्मृतिबीजविवृद्धये क्रियते ॥ १ ॥

टिप्पनकम्.

नत्वा श्रीवीरमेकान्तध्वान्तविध्वंसभास्करम्।
वृत्तौ न्यायावतारस्य स्मृत्यै किमपि टिप्यते ॥१॥

इहाभीष्टदेवतानमस्कारपुरःसरमनुष्ठीयमानं समस्तमपि प्रायः प्रयोजनं निर्विघ्नां सिद्धिमध्यास्ते इति मन्यमानो व्याख्यानेति प्रसिद्धं सिद्ध पूर्वार्द्धेन भगवतो वर्द्धमानस्वामिनो नमस्कारं तथाऽभिधेयादिप्रतिपत्तिमन्तरेण क्वचिदपि प्रेक्षावतां प्रवृत्तिर्नोपपद्यते इत्युत्तरार्द्धेनाभिधेयप्रयोजने च प्रतिपादयन्नाह—अवियुतेत्यादि। सम्बन्धस्तूपायोपेयलक्षणः सामर्थ्यादवसेयः, तत्र समुदायार्थस्य पातनिकयैव व्याख्यातत्वादवयवार्थोऽभिधीयते। "यु मिश्रणे" विशेषेणैकान्तेन युतौ मिश्रीभूतौ वियुतौ, न तथा एवंविधौ सामान्यविशेषौ दिशतीत्येवंशीलस्तम्। अनेन सामान्यादत्यन्ताभिन्नविशेषवादिनां साङ्ख्यानां तथा विशेषेभ्योऽत्यन्ताभिन्नसामान्याभिधायिनां सौगतानां च निरासः, कथंचिदभिन्नयोरेव सामान्यविशेषयोर्विविक्तयुक्त्या पुरः प्रतिपादयिष्यमाणत्वात्। तथा केचिद् धातुपारायणकृतो "यु अमिश्रणे" इति पठन्ति, तथा च "अयुतसिद्धानामाधार्याधारभूतानां यः सम्बन्ध-

इह प्रत्ययहेतु स समवाय " इति वैशेषिकीयसूत्रे अयुतसिद्धानामपृथक् सिद्धानामिति व्याख्यानम् । तथा लोकेऽपि भेदाभिधायी युतशब्द प्रयुज्यमानो दृश्यते । यथा 'द्वावपि भ्रातरावेतौ युतौ जातौ' इत्यादि । ततो विशेषेणैकान्तेन यतौ पृथग्भूतौ न वियुतौ कथञ्चिद्भिन्नावित्यर्थ । अस्मिंश्च व्याख्याने नैयायिकवैशेषिकयोरत्यन्तभिन्नसामान्यविशेषवादिनो प्रतिक्षेप । एव समस्ताद्वैतवादिनामप्यनेन विशेषणेन निरासोऽवसेय, तदेकत्वाभ्युपगम्य प्रत्यक्षाद्युपलभ्यमानाभ्या सामान्यविशेषाभ्या बाधितत्वात् । " वर्द्ध छेदनपूरणयो " चौरादिकत्वादिनि वर्द्धने छिद्यतेऽसाविति खरान्तरात्कर्मण्यल्, ततो वर्द्धश्छिन्नो मानोऽहंकारो येन स तथा तम् । निपूर्वादिण " सर्वे गत्यर्था ज्ञानार्था " इति न्यायतो ज्ञानार्थाद् नितरामीयन्ते यथा स्थितस्वरूपेण परिच्छिद्यन्ते जीवाजीवादयो भाव अनेनेति " परिन्योर्नीणो र्द्यूताभ्रेषयो " (पा ३ । ३ । ३७) इत्यनेन घञि न्याय प्रमाणमार्ग । अवतरन्ति प्राणिनोऽनेनास्मिन्निति वा "अवे तृस्त्रोर्घञ्" (पा ३ । ३ । १२०) अवतारयतीति वा कर्तर्यच् अवतारस्तीर्थ, न्यायस्येति कर्मणि षष्ठी, ततो न्यायस्यावतारो न्यायावतार इति षष्ठीतत्पुरुष । अयमभिप्राय —यथा तीर्थपरम्पराऽवतारेण नद्यादिरुत्तीर्यते, एवमनेनाप्यवतारकल्पेन शास्त्रेण न्यायाम्भोधिरुत्तीर्यते इति । तस्य 'विवृति' विवरण क्रियते इति सबन्ध । स्मृतेर्बीज–सस्कार स्मरणाङ्कुरोत्पादकत्वेन बीजमिव बीजमिति, लक्षणया बीजशब्देन सस्काराभिधानात्, तस्य विवृद्धेनाय । अन्यत्र किल क्षेत्रादौ बीजस्य विशेषतो वृद्धये विशिष्टा वृतिरावरण विधीयते इति प्रतीयमानमर्थान्तरम् ॥ निरतिशयदेवनाम्नवस्थाभिप्रेतार्थसाधकत्वाभावादवियुतसामान्यविशेषदेशिनमित्यनेन भगवतो वचनातिशयमाह । वचनातिशयश्च ज्ञानातिशयमन्तरेण नोपपद्यते इति ज्ञानातिशयोऽप्यभिहितो द्रष्टव्य । वर्द्धमानमित्यनेन तु अपायापगमातिशय सूचित, सर्वानर्थहेतोरहङ्कारस्य भगवता निर्मूलकाषकषितत्वात् । एवमतिशयत्रयान्यथानुपपत्त्या पूजातिशयोऽप्यर्थाभिहित एव । यद्वा वर्द्धते अशोकाद्यष्टमहाप्रातिहार्यसम्पदा वृद्धिमान् भवतीति वर्द्धमान, अस्या च व्युत्पत्तावनेनापि विशेषणेन पूजातिशय प्रादुरभावि ॥

तस्य चेदमादिवाक्यम्,—

प्रमाणव्युत्पादनार्थमिदमारभ्यते ।

'प्रमाणेत्यादि' अनेन च तादात्म्यतदुत्पत्तिलक्षणसंबन्धविकलतया ध्वनेर्बहिरर्थं प्रति प्रामाण्यायोगादभिधेयादिसूचनद्वारेणोत्पन्नार्थसंशयमुखेन श्रोतारः श्रवणं प्रति प्रोत्साह्यन्ते इति धर्मोत्तरो मन्यते । तदयुक्तम् । यदि हि शब्दस्यार्थप्रकाशनं प्रति सामर्थ्यं न समस्ति, तत् कथमसावभिधेयादिसूचनेऽपि पटिष्ठः

अनेन चेत्यादि । न तावच्छब्दार्थयो तादात्म्यलक्षणः संबन्धः, तथा प्रतीतेरभावात् । यदि चाप्रतीयमानमपि तयोस्तादात्म्यं कल्प्येत, तदाग्निमोदकादिध्वनिश्रवणानन्तरं वदनदहनपूरणादयः स्युः, न च दृश्यन्ते, तन्न तयोस्तादात्म्यम् । नापि तदुत्पत्तिलक्षणः संबन्धो विचारभारसहः, यतः शब्देनार्थोऽर्थेन वा शब्दो जन्यते इति विकल्पद्वयम् । तत्र न तावदाद्यः पक्षः, यतः शब्दादर्थोत्पत्त्यभ्युपगमे न कश्चिदप्यसंपूर्णकामः स्यात्, सुवर्णकोटयो भूयादित्यादि ध्वनिनोऽत्यन्तदारिद्र्योपद्रुतस्यापि पुंसः सुवर्णकोट्यादिलाभप्रसङ्गात् । नाप्यर्थेन शब्दो जन्यते इति द्वितीयः पक्षः, अकृतसंकेतस्यापि पुंसः प्रथमपनसदर्शने तच्छब्दोत्पत्तिप्रसङ्गात्, तथा अङ्कुरयत्र कारिशतमित्यादिध्वनीनामर्थाभावेऽप्युत्पत्तेश्च । किंचार्थाद् ध्वनीनामुत्पादे अर्थेषु यथास्वं पुरुषबुद्धिनिरपेक्षाणां शब्दानां श्रवणं स्यात् । न चार्थमात्रात्पुरुषबुद्धिनिरपेक्षाद् ध्वनयः समुत्पद्यमाना विलोक्यन्ते घटन्ते वा । तथाहि—प्रथममर्थदर्शनम्, ततस्तत्प्रतिपादनाभिप्रायः, ततो विवक्षा, ततः स्थानकरणाभिघातः, ततः शब्दनिष्पत्तिः, तन्न शब्दानामर्थजन्यता । इत्थं संबन्धद्वयवैकल्यतो बहिरर्थे शब्दानां प्रामाण्याभावः । अभिधेयादिसूचनेति । यदाह धर्मकीर्तिर्विनिश्चये—"वक्तुरभिप्रेतं तु सूचयेयुः शब्दा इति, अर्थसंशयमुखेन" इति च वदन् अर्थसंशयोऽपि हि प्रवृत्त्यङ्गमिति दर्शयन् अनर्थसंशयस्य प्रवृत्त्यङ्गता निषेधयति ।

स्यात् । न च तस्याप्रामाण्ये एतच्छ्रवणादर्थसंशय कुर्वन्ति प्रेक्षावन्तः तद्वचाहानेः, मिथ्याज्ञानादपि प्रवृत्त्यविरामप्रसङ्गाच्च । अर्चटस्त्वाह—न श्रावकोत्साहकमेतत्, प्रामाण्याभावात्, तेषां चाप्रमाणादप्रवृत्तेः, अन्यथा प्रेक्षावत्ताक्षतेः, किं तर्हि ? प्रकरणार्थकथनावसरोपस्थितपरोपन्यस्तहेत्वसिद्धतोद्भावनार्थम् । तथाहि–समवस्त्येवैवादी, नारब्धव्यमिदम्, अभिधेयादिशून्यत्वात्, काकदन्तपरीक्षावदिति, तदनेनास्य तद्वत्ताप्रकाशकेन वचसा तद्धेतूनामसिद्धतोद्भाव्यते इति । तदयुक्ततरम्, यतो यदीदमप्रमाणमिति नाभिधेयादीनि साक्षाल्लक्षयत् प्रवर्तयति, ततः परोपन्यस्तहेतोरसिद्धता कथयतीति युक्तिरिक्तं पश्यामः, अप्रमाणस्याकिञ्चित्करत्वात्, अन्यथा प्रमाणविचारणमानर्थक्यमश्नुवीत । तस्मादिद प्रमाणभूत सदभिधेयादीनि प्रतिपादयत् प्रेक्षावत. प्रवर्तयतीति प्रकरणादावुपन्यस्तम् । सबन्धशून्यत्वाद्स्य कथमर्थे प्रमाणतेति चेत् ?,

---

अभिधेयादिसूचनेऽपीति । आस्तामभिधेयादीना प्रतिपादने । एव वादीति । एव वक्ष्यमाणप्रकारेण वादवान् एव वदनशीलो वा । तदिति तस्मादर्थे अव्ययम् । अनेनादिवाक्येनास्य शास्त्रस्य तद्वत्ता अभिधेयादिमत्ता ॥ सबन्धशून्यत्वादित्यादि । इह यद्यपि परमार्थतो जैनाना कथञ्चित्तादात्म्यलक्षण शब्दार्थयो सबन्ध । यदाह भगवान् भद्रबाहुस्वामी—

" अभिहाणं अभिहेयाउ होइ भिन्नं अभिन्नं च ।
खुरअग्गिमोयगुच्चारणम्मि जम्हा उ वयणसवणाण ॥१॥
[2]विच्छेदो नवि दाहो न पूरण तेन भिन्न तु ।

---

१ अभिधानमभिधेयाद् भवति भिन्नमभिन्नं च ।
क्षुराग्निमोदकोच्चारणे यस्मात्तु वदनश्रवणयोः ॥१॥
२ विच्छेदो नापि दाहो न पूरण तेन भिन्न तु ।

प्रत्यक्षेऽपि कथ तर्हि सेति वाच्यम् ? । ग्राह्यग्राहकभावमवचन्यवला-
दिति चेत्, अत्रापि वाच्यवाचकभावादिति ब्रूमः । स एव कथ-
मिति चेत्, अध्यक्षेऽपि वेद्यवेदकभावः कथमिति वाच्यम्?, तदुत्पत्ति-
तदाकारताभ्यामिति चेत् । केय? तदुत्पत्तिर्नाम, तज्जन्यतेति चेत् ।
प्रतिक्षणभङ्गुरत्वे सैव दुरुपपादेत्याचक्ष्महे । तथाहि—क्षणनश्व-
रोऽर्थ, स्वक्षणे, पूर्व, पश्चाद् वा कार्य कुर्यादिति त्रयी गति' । तत्र
न तावदाद्यः पक्षः कक्षीकरणीयः, समकालभाविनि व्यापारा-
भावात्, इतरथैकक्षणवर्तिना समस्तार्थक्षणानामितरेतर कार्य-
कारणभावः प्रसज्येत । तथा च तत्प्रयुक्तो ग्राह्यग्राहकभावश्चेस-
समञ्जसमापनीपद्यते'। अथ स्वक्षणात्पूर्वम्, अचार्वितदपि, स्वयम
सतो भविष्यच्छद्मचक्रवर्त्यादेरिव पूर्वकालविवर्तिनि कार्ये व्या-
पाराभावात्। अथ स्वक्षणादूर्ध्वं कार्यं विधत्ते इति मन्येथाः, एतद-
प्यसाधीयः, विनष्टस्य कार्यकरणाक्षमत्वात्, अन्यथा मृतस्य
शिखिनः केकायित स्यात् ॥ तदाकारतापि किमर्थाकारसंक्रान्त्या?,
अथ तत्सदृशतयोत्पत्तेर्ज्ञानस्येति? । यत्राद्यः कल्पः, तदयुक्तम्,

---

जम्हा मोयगुच्चारणमि तत्थेव पच्चओ होइ ॥२॥
न य होइ स अन्नत्थे तेण अभिन्न तदत्थाओ" ॥ इति ॥

तथापि "शठ शाठ्येन निर्लोठनीय" इत्यभिप्रायवान् आचार्यस्तत्म
सिद्धप्रत्यक्षद्वारेण शब्देऽपि प्रामाण्यमाह–प्रत्यक्षेऽपीत्यादि । त्रयीति ।
त्रयोऽवयवा रूपाणि यस्या गतो । गतिरिति । प्रकार । असाधीय इति ।
एतदनयो प्रकर्षेणासाधु, "गुणाङ्गाद्वेष्ठेयसू" (सिद्धहेम ७।३।९)

यस्माद् मोदकोच्चारण तत्रैव प्रत्ययो भवति ॥२॥
न च भवति स अन्यार्थे तेनाभिन्न, तदर्थात् । (छाया)

१ पद्येत इति खपुस्तके

ज्ञाने स्वाकारार्पणादर्थस्य निराकारतानुषङ्गात्, स्वदेहे प्रत्यु-
त्तरार्थदर्शनप्रसङ्गात्, शिरःस्फोट[1]स्थानमनपेक्षमक्षेश्च । उत[2]
द्वितीयः, तथा सति सादृश्यवशादर्थव्यवस्थेत्यायातम् । न च सादृश्य
भवतां दर्शने तात्त्विकमस्ति, विविक्तक्षणक्षयिपरमाणुलक्षणस्व-
लक्षणानां पारमार्थिकत्वाभ्युपगमात् । अनादिकालीनवासना-
प्रबोधसम्पादितसत्ताकनिर्विकल्पकविविक्तदर्शनोत्तरकालभाविविक-
ल्पव्यवस्थापितसादृश्यवशादर्थग्रहणनियमे सत्येकनीलस्वलक्षणे क्ष-
णे सकलकालकलाकलापव्यापिकाकुवलयादिगतनीलताया व्यव-
स्थितिरविशेषेणानुषज्येत, तथा च प्रतिनियतो ग्राह्यग्राहकभावो
न घटामटाट्येत । अङ्गुल्यग्रनिर्दिश्यमानपुरोवर्तिनीलस्वलक्षणदर्श-
नबलायातत्वात् नैल्यविकल्पस्य तदेवाध्यवस्यति न भूतं भावि
काककुवलयादिगतं वा इति चेत्, तर्हि विकल्पः स्वलक्षण-
निष्ठः प्राप्तः, नियतदेशादिसम्बद्धार्थनियासमर्थार्थग्रहणात् ।
तथाहि—तदध्यवसायः किं तद्विकल्पनं ? उत तद्ग्रहणम् ?, न
तावत् तद्विकल्पनम्, विकल्पानां भवदभिप्रायेण स्वलक्षणान्तः
प्रवेशाभावात् ।

विविक्तेति । विविक्ता परस्परमत्यन्तभिन्ना, न पुनरवयव्यादिरूपेण कथञ्चिदेकरूपा । अनादीत्यादि । अनादिकालप्रवाहागता संबद्धा या वासना तस्याः प्रबोधस्तेन सम्पादिता सत्ता यस्य स चासौ, निर्विकल्पं व्यवसाय शून्यं विविक्तं स्फुटं यद्दर्शनं प्रत्यक्षं तदुत्तरकालं भवनशीलो विकल्पश्च तेन व्यवस्थापितं यत्सादृश्यं तस्य वशः सामर्थ्यं, यदुक्तम्—"आयत्तनायामायत्ते प्रभुत्वे च वशः त्रिषु" तस्मात् ।

---

१ "स्फोटन" इति ग पुस्तके २ अथ इति प पुस्तके

तदुक्तम्—

"तेनान्यापोहविषया प्रोक्ताः सामान्यगोचराः।
शब्दाश्च बुद्धयश्चैव वस्तुन्येषामसम्भवात्" ॥१॥ इति।

अथ ब्रूयात्—यद्यपि विकल्पाः सामान्यगोचरयन्ति तत्त्वतः, तथापि प्रत्यक्षविकल्पयोर्योगपद्येन प्रवृत्तेर्विमूढः प्रतिपत्ता विकल्पस्यापि स्वलक्षणनिष्ठता व्यवस्यति। तथा चोक्तम्—

"मनसोर्युगपद्वृत्तेः सविकल्पाविकल्पयोः।
विमूढो लघुवृत्तेर्वा तयोरैक्यं व्यवस्यति" ॥१॥

तेनेत्यादि। यत एव वस्तुनि शब्दार्थे दोषस्तेन कारणेन, अन्यापोहविषया विकल्पबुद्धिप्रतिभासविषया शब्दा बुद्धयश्च प्रोक्ता आचार्य दिग्नागेन। किंभूता बुद्धय, ? सामान्यगोचरा सविकल्पिका न सर्वा, निर्विकल्पप्रत्यक्षबुद्धीनां वस्तुविषयाभ्युपगमात्। बुद्धीनामेवैतद् विशेषणं न शब्दानाम्, तेषां सामान्यविषयत्वाव्यभिचारात्, किं कारण, वस्तुन्येषां शब्दानां विकल्पानां चासम्भवादिति। एतदर्थश्च विस्तरार्थिना प्रमाणवार्तिके कल्याणचन्द्रकृतटीकातोऽवसेय।

मनसोरित्यादि। मन्यते ज्ञायते वस्त्वाभ्यामिति "सर्वधातुभ्योऽसुन्" (पा उणादि) इति असुनि मनसी ज्ञाने तयोः सविकल्पाविकल्पयोरेकत्वं विकल्पयति भ्रान्तः प्रमातेति सम्बन्धः। कुत इत्याह 'युगपद्वृत्ते' गवादिस्वलक्षणविषयनिर्विकल्पप्रत्यक्षानन्तरं पुनर्निर्विकल्पकेन स्वलक्षणस्य तत्समकालमेव विकल्पेन गकारादिवर्णानां च ग्रहणात्। यद्बौद्धालङ्कार –"कथं तर्हि क्रमेण ग्रहणं न भवति, युगपद्विषयसन्निधानात्, नहि वर्णविकल्पकाले प्रत्यक्षप्रत्ययार्थौ न सन्निहित इति"। लघुवृत्तेर्वेति। यथा भवतो लघुवृत्ते शाखाचन्द्रादिविषयसन्निधौ न क्रमेण ग्रहणाध्यवसायस्तथा ममापि निर्विकल्पकसमनन्तरं झगित्येव विकल्पोत्पादात् तयोरैक्याध्यवसाय, न पुनस्तत्त्वतस्तयोरैक्यम्। विशेषतस्त्वेतत्कारिकार्थो बौद्धालङ्कारादेरवसेय

चिकात्तु जलज्ञानमप्रमाण न शेपस्तम्भादिज्ञानानि, नाधारहितत्वा दितिचेत्, तर्हि धनतास्प्यय न्याय। किं काकैर्भक्षितः । नहि वय सर्वशब्दाना प्रामाण्य प्रतिपद्येमहि, किं तर्हि? सुनिश्चिताप्तप्रणेतृ-काणामेव । तत्र प्रामाण्य प्रति प्रत्यक्षशब्दयोर्विशेपमुपलभामहे । एव तु विशेषः स्यात्, प्रत्यक्ष चक्षुरादिसामग्रीविशेपजन्यत्वात् संनिहितनियतार्थग्राहि स्पष्टप्रतिभासम्, शब्द तु तथाविधकारणविकल त्वाद् नियतानियतार्थग्राह्यस्पष्टप्रतिभासम् । न च एप विशेष' प्रामाण्यक्षितिकारी, इतरथानुमानस्याप्यप्रामाण्यप्रासज्येत, तस्याप्यविशदानियतार्थग्राहित्वात् । परमार्थस्तु त्रिकालव्यापिनः सर्वार्थग्रहण-स्वभावत्वेऽपि आवरणतिरस्कृतस्य जीवद्रव्यस्य चक्षुरादिसामग्री-सापेक्षावरणक्षयोपशमवशात् सनिहितस्पष्टार्थग्रहणपरिणामः प्रत्य-क्षमित्युच्यते । शब्दसापेक्षक्षयोपशमात्तु नियतानियताविशदार्थग्रहण परिणामस्तु शाब्दमिति । तत्र तदुत्पत्तितदाकारते प्रत्यक्षे शाब्देऽन्यस्मिन् वा ज्ञाने वास्तव्यौ स्त'। तस्मात्पारमार्थिकाभिधेयप्रयोजनसब-धप्रतिपादकमेतदादिवाक्यमिति स्थितम् ॥

तत्राभिधेय वाच्य तचेह प्रमाणम्, तस्यैव प्रकरणेन प्रतिपाद्य-त्वात्, तत् 'प्रमाण' इत्यवयवेन लक्षयति । प्रयोजन द्विधा, कर्तुः श्रोतुश्च । पुनरपि द्विविध, अनन्तर व्यवहित च । तत्र श्रोतुरनन्तर-

करणे पटपगाशब्दवद् गाजन्त, तद्वदाचरति । वास्तव्याविति । वस्तुशब्दात् वस्तुनि परमार्थ "भवे" इति भवार्थाणप्रत्ययान्नादीप्रत्यय, पारमार्थिक्यावित्यर्थ । वास्तव्यशब्दात्तु स्त्रियामाप्रत्यये वास्तव्य इति स्यात् ।

तत्रेत्यादि । तत्रेति सप्तम्यये वर्तमानो निर्धारणे वर्तते, तच्चाभिधेय त्वगुणेन । तदयमर्थ —तेषामभिधेयादीना मध्येऽभिधेय किमुच्यते, ? आह—वाच्यमिति । अभिधेयशब्दस्य वाच्यमिति नाम पर्याय इति यावत् ।

प्रयोजन प्रमाणविषया व्युत्पत्तिः, कर्तुर्व्युत्पद्यमानस्य प्राशस्त्वात् शिष्यस्य व्युत्पादनम् । तत्रात्मप्रयोजन दर्शयन्नारभ्यते इति, अस्य मयेतिपदसव्यपेक्षत्वात् । शिष्यप्रयोजन तु व्युत्पादिसनेनोपसर्ग धातुसमुदायेनैव तदन्तर्गतं लप्स्यते इत्यभिप्रायवान् कर्त्ताऽऽत्मव्यापार णिजन्तेन निर्दिशति–'प्रमाणव्युत्पादनार्थमिति' । व्यवहित-प्रयोजन द्रेधा, व्यावहारिक पारमार्थिक च। व्यावहारिकं–हेयोपादेयोपेक्षणीयेष्वर्थेषु हानोपादानोपेक्षालक्षणम् । पारमार्थिक अभ्युदयनिःश्रेयसावाप्तिरिति । एतत्तु साक्षादनुक्तमप्यनन्तरप्रयोजन फलत्वात् तद्वचनेनैवाक्षिप्तमवगन्तव्यम् । सबन्धस्तूपायोपेयलक्षणः, तत्रोपेय प्रकरणार्थपरिज्ञानम्, प्रकरणमुपायः, ततस्तदभिलपता प्रकरणमिदमारम्भणीयमिति अनुक्तोऽपि वचनेन सबन्धोऽर्थाद् गम्यते इति तात्पर्यार्थः ।

तत्रैव स्थिते अभिधेय वाच्य–प्रतिपादनीयमिति । आत्मप्रयोजनमित्यादि । आत्मप्रयोजन दर्शयन् कर्ताऽऽत्मनो व्यापार यथाकथचिद् व्युत्पत्स्यन्ते शिष्या, पर मया व्युत्पाद्यमाना व्युत्पद्यन्तामिति प्रयोजकत्वमिनन्तेन कथयतीति सबन्ध । ननु प्रमाणव्युत्पादनार्थमिदमारभ्यते इत्युक्ते प्रयोजनमात्र दर्शित नात्मन इति चेत्, आह–आरभ्यते इत्यस्य मयेति पदसव्यपेक्षत्वादिति । ननु तथापि पूर्वं कर्तु श्रोतुश्च प्रयोजनमभिहितम्, अत्र कर्तुरेवेति तत्कथमित्याह–अभिप्रायवान् । केनोल्लेखेन योऽभिप्राय ? आह–शिष्यप्रयोजनमित्यादि ।

तदन्तर्गतमिति । व्युत्पादनान्तर्गतम् । अभ्युदयनिःश्रेयसावाप्तिरिति । अभ्युदयोऽपवर्गप्राप्तेरर्वाग् देवलोकसुकुललाभादिक सासारिक कल्याणम्, निश्चित केवलपरमानन्दमयत्वात् श्रेय कल्याण समासान्ते अति नि श्रेयस मुक्तिस्तयो प्राप्ति । यद्यपि चेहाभ्युदयसामान्यग्रहणेन तद्विशेषस्वरूपस्य नि श्रेयसस्यापि ग्रह सिद्ध, तथापि गोबलीवर्दन्यायेनोभयोरभिधानमिति ॥

अधुनाक्षरार्थो विव्रियते-तत्र यद्यपि प्रमाणशब्दस्य सर्वकारकैर्भावेन च व्युत्पत्तेः सुकरत्वात् "कृत्यल्युटो बहुलम्" (पा ३ । ४ । ११३) अन्यत्रापि इति वचनाद् यथाक्रममभी कर्त्रर्थादिकारक-भावव्युत्पत्त्या प्रमाणशब्दवाच्याः, तद्यथा-आत्मार्थ[१] ज्ञानार्थ[२]क्रिया[३]-कारणकलाप[४]-क्षयोपशम[५]-क्रियारूपा[६]', तथापीह ज्ञानमेवाधिक्रियते, तस्यैव परीक्षाक्षमत्वात्, इतरेषा परीक्षाया तत्पुरःसरत्वात्, वैयर्थ्याच्च । तथाहि-नार्थस्तावदात्मनः परीक्षया, तस्य भ्रान्ताभ्रान्तज्ञानेषु समानत्वात् । नाप्यर्थस्य, तस्योपेयत्वात्, उपायभूतज्ञानपरीक्षणेनैव गतत्वात् । नार्थक्रियायाः, तदवगतौ परीक्षावैयर्थ्यात् । नापि कारणकलापस्य, ज्ञानोत्पत्तेः प्राक् स्वरूपानवगतेः, पश्चात् तत्स्वरूपनिर्णयादेव तत्साद्गुण्यवैगुण्यावगतेर्नैरर्थक्यात् । नापि क्षयोपशमस्य, तस्य ज्ञानोत्पादोन्नीयमानरूपत्वात् । नापि प्रमितिमात्रस्य, तस्य प्रमाणसाध्यतया तच्चारुताद्वारेणैव समीचीनतासिद्धेरिति । तदयमभिप्राय'—यद्यपि अनन्तधर्माध्यासिते वस्तुनि सर्व एव शब्दार्था निरुपचरिता घटन्ते, तथापि येनार्थं परिच्छिद्यार्थक्रियासमर्थार्थप्रार्थनया प्रवर्तन्ते प्रमातारस्तदेवेह ज्ञानमात्मना सह धर्मिरूपतया तादात्म्येऽपि धर्मरूपतया व्यतिरिक्तं प्रमीयतेऽनेनेति प्रमाणमित्युच्यते । तस्य 'व्युत्पादनम्' परपरिकल्पितलक्षणादिव्युदासेन स्वाभिमतलक्षणादिस्वरूपप्रकाशनम्, तदर्थ-अर्थशब्द प्रयोजनपर्याय, 'इदम्' इति अर्थरूपतया स्वचेतसि विवर्तमानप्रकरणशरीरं परामृ-

---

नार्थ इति । न प्रयोजनम् । नाप्यर्थस्येति। अत्राग्रिमेषु च स्थानेषु परीक्षया प्रयोजनमिति सम्बन्धनीयम् । उन्नीयमानरूपत्वादिति । उत्पूर्वो नयतेः कर्मणि यप्, निर्णीयमानत्वादित्यर्थः ।

शति, द्विविध हि प्रकरणशरीरम्, शब्दोऽर्थश्चेति, बहिः शब्दरूपतया प्रकाशयिष्य१माणत्वेऽप्यन्तस्तत्त्वार्थाकारेण प्रत्यक्षत्वात्। 'आरभ्यते' इति पदवाक्यश्लोकादिरचनया प्रक्रियते इति यावत्।

इह च लक्षणसङ्ख्यागोचरफलेषु प्रमाण प्रति विप्रतिपद्यन्ते परे। तथाहि—लक्षणे तावत्, "प्रमाणमविसंवादि ज्ञानमिति" सौगताः। "अनधिगतार्थाधिगन्तृ प्रमाणमिति" मीमांसकाः। "अर्थोपलब्धिहेतुः प्रमाणमिति" नैयायिकादयः। तथा सङ्ख्याया, "प्रत्यक्षानुमाने द्वे एव प्रमाणे" इति सौगताः। 'प्रत्यक्षानुमान-शब्दोपमानार्थापत्त्यभावाः प्रमाणानीति" मीमांसकाः। "प्रत्यक्षानु-मान-शब्दोपमानानि प्रमाणानीति" नैयायिकाः। "प्रत्यक्षानुमा-

प्रकरणशरीरमिति। प्रकरणस्य स्वरूपम्।

पदेत्यादि। पद प्रसिद्धम्, वाक्य विशिष्टपदसमुदाय। यदाह—

"पदाना संहतिर्वाक्य सापेक्षाणा परस्परम्।
सा ख्याताः कल्पनास्तत्र पश्चात्सन्तु यथायथम्॥"

श्लोकश्छन्दोमात्रम्। आदिग्रहणात् प्रत्यक्षानुमानप्रकरणादिग्रह। सौगता इति। सुष्ठु अपुनरावृत्त्या गत गमन "सर्वे गत्यर्था ज्ञानार्था" इति न्यायात् शोभन ज्ञान वा यस्य स तथा, स देवता येषा "साऽस्य देवता" (पा० ४। २। २४) इति अण्, यद्वा सुगतस्य इमे सौगता "तस्येदम्" (पा० ४। ३। १२०) इति अण्। मीमांसका इति। मीमांसाशब्द पूजितविचारवचनस्ता विदन्त्यधीयते वा, "क्रमादिभ्योऽक" इत्यकप्रत्यय, यद्वा मीमांसयन्ति विचारयन्ति यथावस्थितस्वरूपेण प्रमाणप्रमेयादिवस्तुजातमिति मीमांसका कर्तरि वुण्। नैयायिकादय इति। न्याय विदन्त्यधीयते वा "क्रतूक्थादेष्ठण" इति विश्रान्तसूत्रेण ठण् "ठस्येक" इतीकादेश। प्रत्यक्षानुमानशब्दोपमानार्थापत्त्यभावाः प्रमा-

१ 'शोभनतया' इति ख०

नशब्दानि प्रमाणानीति" वैशेषिकाः । एतान्येव साङ्ख्याः । प्रत्यक्षमेवैकं प्रमाणमिति चार्वाकाः । तथा गोचरे, परस्परविनिर्लुठितक्षणक्षयिपरमाणुलक्षणानि स्वलक्षणानि प्रमाणगोचरस्तात्त्विक इति बौद्धाः । सामान्यविशेषात्मकं वस्त्विति मीमांसकाः । परस्पराविभक्तौ सामान्यविशेषाविति नैयायिकवैशेषिकाः । त्रैगुण्यरूपं सामा-

---

णानीति । यदाहुस्तद्वादिनः —

"प्रत्यक्षमनुमानं च शाब्दं चोपमया सह ।
अर्थापत्तिरभावश्च षट् प्रमाणानि जैमिनेः ॥"

प्रभाकरस्य चाऽभावप्रमाणं प्रत्यक्षविशेषं वदतः पञ्च प्रमाणानीति । *प्रत्यक्षानुमानशब्दानि प्रमाणानीति वैशेषिका इति ।* व्योमशिवापि प्रायेणैतत्प्रमाणत्रिनियमशोऽपदाचार्यः । कन्दलीकारस्तु प्रत्यक्षानुमाने द्वे एव प्रमाणे प्राह । नित्यद्रव्यवृत्तयोऽन्त्या विशेषाः, विशेषा एव वैशेषिकम्, "विनयादे" (पा० ५ । ४ । ३४) इति स्वार्थे ठण्, ततो वैशेषिकं विदन्त्यधीयते वा वैशेषिकाः, "तद्वेत्त्यधीते" (सिद्ध. ६ । २ । ११७) इत्यण् ॥ **एतान्येव साङ्ख्या इति ।** सङ्ख्या पञ्चविंशतितत्त्वानि, यदाहुः साङ्ख्याः —

पञ्चविंशतितत्त्वज्ञो यत्र तत्राश्रमे रतः ।
जटी मुण्डी शिखी वाऽपि मुच्यते नात्र संशयः ॥१॥

तां विदन्त्यधीयते वा साङ्ख्याः, पूर्ववदण् । शाङ्ख्यादिरपि शाङ्ख्यध्वनिरस्तीति वृद्धाम्नायः, तथाहि—शङ्खनामा कश्चिदाद्यः पुरुषविशेषः, तस्यापत्यं पौत्रादिरिति गर्गादित्वाद् य्णप्रत्ययः ॥ **प्रत्यक्षमेवैकं प्रमाणमिति चार्वाका इति ।** "चर्व अदने" चर्वन्ति भक्षयन्ति तत्त्वतो न मन्यन्ते पुण्यपापादिकं परोक्षं वस्तुजातमिति चार्वाकाः, "मवाकश्यामाकेत्यादि" सिद्धहेमोणादिदण्डकेन (सू० ३७) निपातनात् ॥ प्रमाण[1]सङ्ख्यासङ्ग्रहाय श्लोकश्चात्र—

---

१ '°सङ्ख्या°' टि॰ ग

न्यमिति सांख्याः । भूतचतुष्टयं प्रमाणभूमीति चार्वाकाः । तथा फलेऽपि विप्रतिपद्यन्ते, अर्थाधिगतिः प्रमाणफलमिति सौगताः । पूर्वं पूर्वं प्रमाणमुत्तरमुत्तरं तु फलमिति मीमांसकादयः ।

तत्र तावल्लक्षणसंख्याविप्रतिपत्तीर्निराचिकीर्षुराह,—

प्रमाणं स्वपराभासि ज्ञानं, बाधविवर्जितम् ।
प्रत्यक्षं च परोक्षं च द्विधा, मेयविनिश्चयात् ॥ १॥

तत्रापि पूर्वार्द्धेन लक्षणविप्रतिपत्तिमुत्तरार्द्धेन तु संख्याविप्रतिपत्तिं निराचष्टे । लक्षणं च पररूपेभ्यो व्यावर्तनक्षमोऽसाधारणधर्मः, लक्ष्यते परिच्छिद्यते विजातीयेभ्यो व्यावृत्तं लक्ष्यं येन तल्लक्षणमित्युच्यते । तच्चेह द्वये प्रसाध्याः, स्वदर्शनानुरक्तान्तःकरणास्तीर्थान्तरीयाः विप्रतिपन्नाः, तथा मुग्धबुद्धयो लौकिका अव्युत्पन्ना-

"चार्वाकोऽध्यक्षमेकं, सुगतकणभुजौ सानुमानं, सशाब्दं
तद्द्वैतं पारमर्षः, सहितमुपमया तत्त्रयं चाक्षपादः ।
अर्थापत्त्या प्रभाकृद् वदति, स निखिलं मन्यते भट्ट एतत्
साभावं, द्वे प्रमाणे जिनपतिसमये स्पष्टतोऽस्पष्टतश्च ॥"

त्रैगुण्यरूपं सामान्यमिति । त्रयो गुणाः सत्त्वरजस्तमांसि, तत स्वार्थे "ष्योऽनन्तात्" इति ष्य त्रयो लोकास्त्रैलोक्यं षड् गुणाः षाड्गुण्यम्, ततस्त्रैगुण्यं रूपं स्वभावो यस्य सामान्यस्य तत् त्रैगुण्यरूपम् । भूतचतुष्टयमिति । पृथ्व्यप्तेजोवायुलक्षणम् । केचिदेव तु चार्वाकैकदेशीया आकाशलक्षणं पञ्चमं भूतमभिमन्यमाना पञ्चभूतात्मकं जगदाचक्षते इति ॥

तीर्थान्तरीयेत्यादि । तीर्यते भवाब्धिरनेनेति तीर्थं द्वादशाङ्गं तदाधारो वा सङ्घः, तस्मादन्यत्तीर्थान्तरं तत्र भवास्तीर्थान्तरीयाः । लौकिका इति । लोके भवा अध्यात्मादिराकृतिगणत्वात् "अध्यात्मादेः" इति ठञ् प्रत्ययः ।

श्चेति । ततश्च यदादौ विप्रतिपन्नान् प्रति लक्षणं तदैव लक्ष्यलक्षणभावो द्रष्टव्यः । यदिदं भवतामस्माकं च प्रमाणमिति प्रसिद्धम्, तत्स्वपराभासि ज्ञानं बाधविवर्जितं मन्तव्यम्, प्रसिद्धं प्रमाणमनूद्याप्रसिद्धं स्वपराभासित्वादि विधीयते । यदा तु अव्युत्पन्नमतीन् प्रतीदं लक्षणम्, तदा प्रतिप्राणि स्वपरप्रकाशिनो ज्ञानस्य बाधारहितस्य कस्यचित् सिद्धत्वात्, अन्यथा प्रतिनियतव्यवहारोच्छेदप्रसङ्गात् । एवं ते बोध्यन्ते—यदिदं भवता क्वचिन्नियतार्थग्राहि स्वपरप्रकाशकं बाधारहितं ज्ञानं प्रसिद्धं तत् प्रमाणमिति बुध्यन्ताम् । अत्रापि सिद्धस्यानुवादोऽसिद्धस्य विधानं योज्यम् ।

अधुनाक्षरार्थः—तत्र प्रमाणमिति पूर्ववत् । स्व आत्मा स्वरूपं परोऽर्थः, तावाभासयितुं प्रकाशयितुं शीलमस्य तत्तथा । ज्ञायते निर्णीयते तत्त्वं येन तद् ज्ञानम् । बाध्यतेऽनेनेति बाधः, विपरीतार्थोपस्थापकप्रमाणप्रवृत्तिरिति यावत् । तेन विशेषेण वर्जितं रहितं यज्ज्ञानं तत्प्रमाणमिति सटङ्कः ।

इह च व्यवच्छेद्यापेक्षया लक्षणे विशेषणप्रवृत्ते 'स्वपराभासि' इत्यनेन ये स्वाभास्येव ज्ञानं मन्यन्ते ज्ञानवादिनो बौद्धविशेषाः, ये च पराभास्येव मीमांसकनैयायिकादयस्ते निरस्ताः । ते हि बहिरर्थाभावात् ज्ञानं स्वांशपर्यवसितसत्ताकमित्याचक्षीरन्, तदयुक्तम्, ज्ञेयार्थाभावे ज्ञानाभावप्रसङ्गात् । अथार्थाभावेऽपि स्वप्नदशायां वनदेवकुलादिनानाप्रतिभासं ज्ञानमलौकिकमिति तथाभूतं सकलं ब्रूपे, तन्न, तस्यापि जाग्रदवस्थाभाविप्रभूतार्थदर्शनप्रपादितात्मसंस्कारमिद्धादिकारणकलापसंनिधानप्रबोधव्यपेक्षत्वात्, इतरथाऽत्यन्ता-

तस्यापीत्यादि । स्वप्नदशाज्ञानस्यापि जाग्रदवस्थायां भवनशीलं यत्प्रभूतार्थदर्शनं तेन प्रपादितो य आत्मनः संस्कारस्तस्य मिद्धादिकारणकलापसंनिधानेन यः प्रबोधस्तं व्यपेक्षते, "कर्मण्यण्" (पा ३ । २ । १),

५ । मिद्धादीति । मिद्धशब्दो निद्राभिधायी नपुंसकः । यद्वि

नुभूतभूतपञ्चव्यतिरिक्तषष्ठभूतप्रतिभासः स्यात् । किंच कथमेकं ज्ञानं सितपीताद्यनेकाकारविवर्तमिति प्रष्टव्यो भवान् । अनाद्यविद्यावासनात इति चेत् , अत्रापि विकल्पयुगलमलमवतरति, ततो ज्ञानात् सा वासना व्यतिरेकिणी न वा । व्यतिरेकिणी चेद् , एवं सति तद्ग्राहकप्रमाणमभिधानीयम्, ज्ञानव्यतिरिक्तायाः संवेदनाभावात् , तत्संवेदने चार्थस्यापि व्यतिरिक्तस्य संवेदनमिति स दुष्प्रतिषेधः स्यात् । वेद्यवेदकाकारकलुषिताज्ज्ञानादेव व्यतिरिक्ता तत्कारणभूता ज्ञानरूपैव साऽनुमीयते इति चेत्, न, तया सह संबन्धग्रहणाभावात्, दृष्टहान्यदृष्टपरिकल्पनाप्रसङ्गाच्च । किंच यथा व्यतिरि-

निश्चयटीकायां धर्मोत्तरः—“मिद्धं निद्रेति” । आदिशब्दाद्दृष्टं दध्यादिभोजनं सजलादिदेशो निशीथादिकालो वातादिप्रकृतिर्वातादिदूषितत्वं चेत्यादि गृह्यते । तथा चात्रार्थे आगमः—

“[1]अणुहूयदिट्ठचिंतियसुयपयइवियारदेवयाणूया ।
सुमिणस्स निमित्ताइं पुण्णं पावं च नाभावो” ॥१॥

अत्र ‘अणूयति’ अनूपः सजलदेशः ॥ वेद्येत्यादि । एवशब्दो भिन्नक्रमे, ततोऽयमर्थः—वेद्यवेदकाकारकलुषितादेव ज्ञानाद् व्यतिरिक्ता न तु ज्ञानमात्रादपीति, अत एव आह—तत्कारणभूता वेद्यवेदकाकारकलुषज्ञानस्य हेतुभूता । ज्ञानरूपैवेति । अयमभिप्रायः—ज्ञानरूपा वासना पूर्वक्षणवर्तिनी वेद्यवेदकाकारकलुषमुत्तरक्षणवर्ति विज्ञानं जनयतीति ॥ तयेत्यादि । तया वासनया सह वेद्यवेदकाकारकलुषज्ञानस्य कार्यकारणभावलक्षणसंबन्धग्रहणाभावात् , तदभावश्च भवदभिप्रायेण पूर्वापरक्षणवर्तिज्ञानव्यतिरिक्तस्य[2] ग्राहकस्यात्मनोऽसत्त्वात् । दृष्टहानीत्यादि । घटादिसहितचक्षुरादिसामग्रीतोऽन्वयव्यतिरेकाभ्यां ज्ञानमुत्पद्यते इति दृष्टस्य प्रत्यक्षाद्यनिराकृतस्य

१ अनुभूतदृष्टचिन्तितश्रुतप्रकृतिविकारदैवतानूपाः ।
स्वप्नस्य निमित्तानि पुण्यं पापं च नाभावः ॥ १ ॥
२ ‘व्यतिरिक्तमा°’ टि ख ।

क्वासनावशादेकमपि ज्ञानं नानाकारम्, तथा जडमपि तद्वशादेव बोधरूपं प्रकाशत इति विपरीतापत्तेरर्थ एव सिद्धिमास्कन्देद् न ज्ञानम्। अथाव्यतिरिक्ता, हन्त ज्ञानमेव, तन्न वासना तदव्यतिरिक्तत्वात् तत्स्वरूपवदित्यास्तां तावत्। परामास्यपि स्वप्रकाशाभावादभिदधीरन्, तदप्यसंबद्धम्। स्वप्रकाशाभावे परप्रकाशायोगात्। नहि प्रदीपः स्वरूपमनुद्द्योतयन् घटाद्युद्द्योतने व्याप्रियते, स्वयं चाप्रतीतमपि यद्यर्थं ग्राहयति ज्ञानम्, देवदत्तस्योत्पन्नं (ज्ञानं) यज्ञदत्तं ग्राहयेत्, विशेषाभावात्। अन्यच्च परप्रकाशनमात्रेऽपि दूरासन्नादिभेदः प्रथमानानामर्थानां किमपेक्षश्चकास्ति, शरीरापेक्ष इति चेत्, न, तस्यापि प्रकाश्यताविशेषात्, तस्मादन्तर्मुखाकारस्य बहिरर्थग्रहणे सति अयं घटादिप्रतीकते नान्यथा। अथार्थापत्त्यादिना प्रमाणान्तरेण तदन्तर्निविष्टं गृह्यते, ततस्तदपेक्षया योक्ष्यते दूरासन्नादिभेद इति चेत्, न, तत्रापि विकल्पयुगलकानतिवृत्तेः। तथाहि— तत्प्रमाणान्तरं स्वप्रकाशमन्यप्रकाशं वा। स्व-

---

व्यवहारस्य हानिः, तथा प्रत्यक्षादिभिः प्रमाणैरसंवेद्यमानाया वासनायाः सकाशात् सितपीतादिनानाकारकलितमध्यक्षमुत्पद्यते इत्यदृष्टं तस्य परिकल्पना तयोः प्रसङ्गात्। जडमपीति। अचिद्रूपमपि ज्ञानम्। नहीति। यदुक्तम्—

" दीपवन्नोपपद्येत बाह्यवस्तुप्रकाशनम्।
अनात्मवेदने ज्ञाने जगदान्ध्यं प्रसज्यते " ॥१॥

विशेषाभावादिति। देवदत्तोत्पन्नज्ञानस्य देवदत्तयज्ञदत्ताभ्यामसंवेद्यमानत्वेनाविशेषात्। प्रथमानानामिति। प्रकाशमानानाम्। अन्तर्मुखेत्यादि। अन्तर्मुखोऽन्तःप्रकाशक आकारो यस्य ज्ञानस्य तस्यैव बाह्यार्थपरिच्छेदे सति अयं दूरासन्नादिभेदः संगच्छते। अर्थापत्त्यादिनेति। यदि ज्ञानं मयि उत्पन्नं न स्यात् तर्हि अर्थप्रकटता मे न स्यात् तस्मादर्थप्राकट्यान्यथानुपपत्त्या ज्ञानं शरीरान्तर्निविष्टमिति व्यवस्थाप्यते। यदुक्तम्—